International Journal of Jyotish Research: 2021; 6(1): 30-35

International Journal of Jyotish Research (वेदचक्षु)

**ISSN:** 2456-4427
**Impact Factor:** RJIF: 5.11
Jyotish 2021; 6(1): 30-35
© 2021 Jyotish
www.jyotishajournal.com
Received: 09-11-2020
Accepted: 12-01-2021

**कु॰ अपूर्वा अग्रवालः**
सहायकाचार्या, ज्योतिषविभागः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
वेरावलम् गीर-सोमनाथः,
गुजरातम्, भारत

**Correspondence**
**कु॰ अपूर्वा अग्रवालः**
सहायकाचार्या, ज्योतिषविभागः
श्रीसोमनाथसंस्कृतविश्वविद्यालयः,
वेरावलम् गीर-सोमनाथः,
गुजरातम्, भारत

# मर्मस्थानविमर्शः

**कु॰ अपूर्वा अग्रवालः**

**DOI:** https://doi.org/10.22271/24564427.2021.v6.i1a.103

**प्रस्तावना –**

वसन्ति प्राणिनो यत्र तद्वास्त्विति व्युत्पत्त्या वास्तुशब्दस्याभिप्रायो वर्तते निवासस्थानमिति । यथोक्तम् अमर्त्याश्चैव मर्त्याश्च यत्र यत्र वसन्ति हि । तद् वास्त्विति ............ ॥ [1] 'वस्' धातोः 'तुण्' प्रत्यये कृते सति 'वास्तु' इति शब्दस्य सिद्धिर्भवति । आचार्येण विश्वकर्मणा वास्तुशब्दस्य अतिव्यापकमर्थं प्रतिपादितं यथा देव-मनुष्य-पशु-पक्षीत्यादीनां निवासभूमिः वास्तु नाम इति –

देवानां नराणाञ्च गजगोवाजिनामपि ।
निवासभूमिश्शिल्पज्ञैर्वास्तुसञ्ज्ञमितीर्यते ॥ [2]

एवं वास्तोः अनेकाः भेदाः सन्ति, यथा गृह-भवन-राजप्रासाद-देवालय-ग्राम-पुर-नगरादयः । प्राणिनः स्वीयस्य प्रकृत्यनुकूलवास्तौ निवसन्ति । मानवस्य वास्तु वर्तते गृहम् । प्रत्येकं मानवस्य जीवने गृहनिर्माणमत्यन्तमावश्यकं कार्यं भवति यतोहि स्वीयस्य गृहे एव निवसन् मानवः सुखं सुरक्षाञ्चानुभवति । परगृहे कृताः सर्वाः क्रियाः निष्फलाः भवन्ति । यथोक्तम् –

परगेहकृतास्सर्वा: श्रौतस्मार्तक्रियाः शुभाः।
निष्फलाः स्युर्यतस्तासां भूमीशः फलमश्नुते ।। [3]

वास्तुशास्त्रीयग्रन्थेषु वर्णित-नियमानुसारं प्रकृत्यनुकूलं वास्तोः निर्माणं क्रियते चेत् मानवः सर्वविधं सुखं, समृद्धिं, प्रतिष्ठाम्, आरोग्यं, सुरक्षितवातावरणं, शान्तिञ्च प्राप्नोति । अतः वास्तुसिद्धान्तानुगुणं वास्तोः निर्माणं करणीयम् । वैदिकसाहित्ये वास्तुक्षेत्रस्योपरि वास्तुपुरुषस्याद्वितीया परिकल्पना कृता वर्तते, वास्तुनिर्माणसमये वास्तुपुरुषस्योपरि मर्मस्थानस्य निर्धारणमवश्यमेव कुर्यात् । मर्मस्थानं वास्तुपुरुषस्य संवेदनशीलस्थानं भवति, यस्योपरि निर्माणकार्यं वर्जितमस्ति । अतः मर्मवेधदोषस्य विचारपुरस्सरमेव निर्माणकार्यं करणीयम् –

मर्मशूलं च यत्नेन वर्जयेद् वास्तुकोविदः ।
सूत्रादीनां गृहाङ्गैश्च पीडा चेत् सर्वनाशनम् ॥
तस्मात् सर्वप्रयत्नेन सूत्रादीनि विवर्जयेत् । [4]

वास्तुमण्डले देवानां न्यासप्रक्रिया –

मर्मस्थानस्य ज्ञानात् पूर्वं वास्तुमण्डले देवानां न्यासप्रक्रियायाः उल्लेखोऽपेक्षितः वर्तते । वास्तुशास्त्रानुसारं वास्तुविशेषस्य निर्माणाय भूक्षेत्रस्य विविधाः खण्डाः क्रियन्ते । ते खण्डाः 'पदम्' इति शब्देनोच्यते । वास्तुनिर्माणाय पदविन्यासस्य मुख्यतः द्वात्रिंशत् (32) प्रकाराः भवन्ति । वस्तुतः एतेषां द्वात्रिंशद्वास्तुपदविन्यासानामुपयोगः विशेषप्रयोजनमनुद्दिश्य क्रियते । यथा ग्राम-पुर-नगर-खेटादीनां निर्माणाय चतुष्षष्टिवास्तुपदमण्डलं (मण्डूकम्), गृह-भवन-राजप्रासाद-वेश्मादीनां निर्माणाय एकाशीतिवास्तुपदमण्डलम् (परमशायिकम्) एवञ्च देव-प्रासाद-विचित्रमण्डपानां निर्मातुं शतपदवास्तुमण्डलं (आसनम्) विधेयम् । [5] यथा प्राप्यते समराङ्गणसूत्रधारे –

वर्णिनां भवनादीनि निवेशा राजवेश्मनाम् ।
एकाशीतिपदेनेन्द्रस्थानं च विभयेत् सुधीः ॥
प्रासादा विविधास्तद्वद् विचित्राश्चात्र मण्डपाः । तान् मापयेच्छतपदप्रविभागेन बुद्धिमान् ॥
यः पुनः स्याच्चतुःषष्टिपदस्तेन विभाजयेत् ।
नरेन्द्रशिबिरग्रामखेटादि नगरादि च ॥[6]

वास्तुपदमण्डलस्य बाह्यपदेषु द्वात्रिंशद् (32) देवाः, आन्तरिकपदेषु च त्रयोदश (13) देवाः विराजमानाः सन्ति । एवमाहत्य वास्तुपदमण्डले पञ्चचत्वारिंशत् (45) देवानां न्यासो भवति । यथा प्राप्यते बृहत्संहितायाम् –

अन्तस्त्रयोदश सुरा द्वात्रिंशद्बाह्यकोष्ठस्थाः ॥ [7]

बाह्यपदेषु विराजमानाः देवाः ईशानकोणतः आरभ्य क्रमशः शिखि-पर्जन्य-जयन्त-इन्द्र-सूर्य-सत्य-भृश-अन्तरिक्ष-अनिल-पूषा-वितथ-बृहत्क्षत-यम-गन्धर्व-भृङ्गराज-मृग-पिता-दौवारिक-सुग्रीव-कुसुमदन्त-वरुण-असुर-शोष-पापयक्ष्मा-रोग-नाग-मुख्य-भल्लाट-सोम-सर्प-अदिति-दितयः सन्ति । तथैव आन्तरिकपदेषु पुर्वोत्तरे आप-आपवत्सौ, पूर्वदक्षिणे सविता-सावित्रौ, दक्षिणपश्चिमे इन्द्र-जयौ, पश्चिमोत्तरे रुद्र-रुद्रजयौ च प्रतिष्ठिताः सन्ति । क्षेत्रस्य मध्ये ब्रह्मा, ब्रह्मणश्च परितः चतुर्षु दिक्षु पूर्वादि-क्रमेण अर्यमा, विवस्वान्, मित्रः, पृथिवीधरश्च सन्ति । इत्थं वास्तुपदविन्यासे पञ्चचत्वारिंशद्देवानां स्थितिर्वर्तते ।

**यथा एकाशीतिपदवास्तुमण्डले देवानां न्यासप्रक्रिया –**

गृहस्य भवनस्य वा निर्माणाय एकाशीतिवास्तुपदानां विन्यासः क्रियते । क्षेत्रेऽस्मिन् दशरेखाः शिराः वा पूर्वापराः, दशशिराः च याम्योत्तराः भवन्ति ।[8] अनेन अत्र एकाशीतिपदानि (81) भवन्ति । एकाशीतिपदमण्डले देवानां पदसङ्ख्या –

एकाशीतिपदे ब्रह्मा नवांशोऽथार्यमादयः ।
षडांशा कोणकाणाद्यंशा शेषा एकपदे सुराः ॥ [9]

अर्थादेकाशीतिपदवास्तोः मध्ये नव पदेषु ब्रह्मा तिष्ठति । तस्य पूर्वादि-चतुर्षु दिक्षु षट्-षट् पदेषु अर्यमा, विवस्वान्, मित्रः, पृथिवीधरश्च स्थिताः भवन्ति । ईशानादि-कोणेषु द्वयोः द्वयोः पदयोः आपः,आपवत्सः, सावित्रः, सविता, जयः, इन्द्रः, रुद्रः,रुद्रजयश्च न्यस्तव्याः । बाह्यपङ्क्तौ एकैकस्मिन् पदे शिखि-पर्जन्य-जयन्तादयः द्वात्रिंशद्देवाः तिष्ठन्ति । यथा चित्रेऽस्मिन् एकाशीतिवास्तुपदे देवानां न्यासक्रमः–




अनेन प्रकारेण विविधाकृतिकभूक्षेत्रेष्वस्मिन्नेव क्रमे द्वात्रिंशत् प्रकारेषु वास्तुपदमण्डलेषु देवानां न्यासो भवति।

**मर्मस्थानम्-**

वैदिकसाहित्ये मानवस्य कल्याणमुद्दिश्य वास्तुभूमौ वास्तुपुरुषस्य परिकल्पना कृता । यथा मानवस्य शरीरं शिर-मुख-हस्त-पादादिषु विभिन्नेषु अङ्गेषु विभक्तमस्ति, तथैव वास्तुपुरुषस्यापि विभिन्नानि अङ्गानि भवन्ति । मानवसदृशं वास्तुपुरुषस्य कानिचन संवेदनशीलाङ्गानि भवन्ति, यानि अङ्गानि मर्मस्थानमिति नाम्ना प्रोच्यन्ते । वास्तुनिर्माणसमये तेषां मर्मस्थानानां वेधः न कर्तव्यः।

- महाराजाधिराजश्रीभोजदेवानुसारेण वास्तुपुरुषस्य शिरः, मुखं, हृदयं, स्तनद्वयं, नाभिप्रदेशश्चैतानि षडङ्गानि मर्मस्थानानि सन्ति । एतेषां मर्मस्थानानां कृते श्रीभोजदेवेन 'षण्महान्ति' इति विशिष्टसंज्ञा प्रदत्ता । यथोक्तं समराङ्गणसूत्रधारे –

मुखे हृदि च नाभौ च मूर्ध्नि च स्तनयोस्तथा।
मर्माणि वास्तुपुंसोऽस्य षण्महान्ति प्रचक्षते॥ 10



यथा चित्रेऽस्मिन् षट् मर्मस्थानानि

- मर्मस्थानस्य विषये आचार्यवराहमिहिरस्य वचनमस्ति यत् पदानां मध्ये वंशानां 11 नाम कोणगतसूत्राणां परस्परं सम्पात एव मर्मस्थानमिति–

सम्पाता वंशानां मध्यानि समानि यानि च पदानाम्।
मर्माणि तानि विन्द्यान्न तानि परिपीडयेत्प्राज्ञः॥ 12

- मयमतमिति ग्रन्थस्य सप्तमाध्याये मयमुनिना ब्रह्मस्थानमेव मर्मस्थानमिति कथितम् । तद्यथा-

वास्तुमध्ये तु मर्माणि ब्रह्मा हृदयमुच्यते ॥ 13

ब्रह्मस्थाने पूर्वादि-दशदिशां संयोगः भवति, परिणामतः तत्र सर्वेषां विविधप्रकृतियुक्तानां दिशाधिपतीनां देवानामुपस्थितौ विक्षोभः उत्पद्यते । अतः निर्माणकार्ये ब्रह्मस्थानं त्यक्तव्यम् ।



ब्रह्मस्थानम् - मर्मस्थानम्

**अतिमर्मस्थानम् –**

मर्मस्थानान्यतिरिच्य वास्तुपुरुषस्य कानिचन अतिमर्मस्थानान्यपि भवन्ति, येषु स्थानेषु केनापि प्रकारेण निर्माणकार्यं वर्जयेत् । आचार्याणां मतानुसारं द्वयोः वंशसूत्रयोः चतुर्णाञ्च रज्जूसंज्ञकानां 14 सूत्राणां परस्परं सम्पातस्थानानि अतिमर्मस्थानानि भवन्ति ।




यथा चित्रेऽस्मिन् अतिमर्मस्थानानि उल्लिखितानि

**तद्यथोक्तम् आचार्येण वराहमिहिरेण –**

रोगाद्वायुं पितृतो हुताशनं शोषसूत्रमपि वितथात् ।
मुख्याद्भृशं जयन्ताच्च भृङ्गमदितेश्च सुग्रीवम् ॥
तत्सम्पाता नव ये तान्यतिमर्माणि सम्प्रदिष्टानि ।
यश्च पदस्याष्टांशस्तत् प्रोक्तं मर्मपरिमाणम् ॥15

अर्थात् रोगादारभ्य वायुपर्यन्तं, पितृस्थानात् शिखिपर्यन्तं, वितथात् शोषपर्यन्तं, मुख्याद् भृशपर्यन्तं, जयन्ताद् भृङ्गपर्यन्तम्, अदितेश्च सुग्रीवपर्यन्तं षट् सूत्राणि विलिख्यन्ते । तेषां सूत्राणां नव स्थानेषु परस्परं सम्पातः भवति, तानि नव सम्पातस्थानानि वास्तुपुरुषस्य 'अतिमर्मस्थानानि' कथ्यन्ते । तेषां परिमाण एकस्य पदस्य अष्टमांशतुल्यं भवति ।

**मर्मस्थानवेधफलम् –**

वास्तुभूमौ मर्मस्थानम्, अतिमर्मस्थानं, ब्रह्मस्थानञ्च वास्तुपुरुषस्य अतिसंवेदनशीलस्थानानि सन्ति । अतः गृहनिर्माणसमये एतानि मर्मस्थानानि, ब्रह्मस्थानम्, अतिमर्मस्थानानि च नैव पीडयेयुरिति सिद्धान्तः सर्वैः वास्तुविद्भिः स्वीकृतः । अर्थादेतेषाम् अतिसंवेदनशीलस्थानानामुपरि निर्माणकार्यं नैव कुर्यादन्यथा वास्तुपुरुषस्य वेधः भवति । यथोक्तं मयमुनिना-

गृहे गृहे मनुष्याणां शुभाशुभकरः स्मृत ।
तस्याङ्गानि गृहाङ्गैश्च विद्वान् नैवोपपीडयेत् ॥ 16

अतः वास्तुनिर्माणकाले एतस्योपरि विशेषध्यानं दातव्यं यत् गृहस्य मर्मस्थानं नैव पीडयेत् । पीडितमर्मस्थानस्य विविधाः दुष्परिणामाः अपि दृश्यन्ते, येषां विस्तृतविवेचनमस्माकं प्राचीनाचार्यैः कृतमस्ति । यथा श्रीभोजदेवस्य कथनम् –

द्वारैर्वा भित्तिभिर्वापि मर्मणां परिपीडनात् ।
दौर्गत्यं गृहिणः प्राहुः कुलहानिमथापि वा ॥
भवेत् स्वामिक्षयः स्तम्भैस्तुलाभिः स्त्रीपरिक्षयः ।
स्नुषावधो जयन्तीभिर्बन्धुनाशश्च सङ्ग्रहैः ॥
मर्मस्थानगतैः कार्यैर्भर्तुः कायो निपीड्यते ।
सुहृद्विश्लेषमिच्छन्ति सन्धिपालैश्च तद्विदः ॥
नागपाशैर्धनोच्छेदो नागदन्तैः सुहृत्क्षयः ।
कपिच्छकैश्च मर्मस्थैः प्रेष्याणां क्षयमादिशेत् ॥
षड्दारुकाण्यनुसिरागवाक्षालोकनानि च ।
मर्ममध्योपगान्येतान्यावहन्ति धनक्षयम् ॥ 17

अर्थाद्द्वारस्य कारणात्, भित्तिकारणाद्वा मर्मस्थानं पीड्यते चेत् गृहिणः दुर्गतिः, कुलस्य च नाशो भवति । स्तम्भैः मर्मस्थानं पीड्यते चेत् गृहस्वामिनः नाशो भवति । तुलाभिः मर्मस्थानस्य वेधः क्रियते चेत् स्त्रीनाशः, जयन्तीभिश्च (पताका) वेधः क्रियते चेत् पुत्रवध्वाः नाशः कथ्यते । मर्मस्थाने अधिकवस्तूनां सङ्ग्रहः क्रियते चेत् बन्धुनाशः भवति । मर्मस्थाने निर्माणकार्येण निर्माणकर्ता शारीरिककष्टमनुभवति । तथैव सन्धिपालैः मर्मस्थानस्य वेधेन मित्राणां क्षयः, नागपाशैः वेधेन धननाशः, नागदन्तैः मित्रनाशः, कपिच्छकैः सेवकानां नाशः, षड्दारु-अनुसिरा-गवाक्ष-अवलोकनकैश्चार्थनाशः कथ्यते ।

वास्तुमञ्जरीकारस्यानुसारमपि मर्मस्थानस्योपरि भित्ति-स्तम्भादीनां निर्माणं न कारयेदन्यथा गृहस्वामिनः कुले उच्चाटनं, बन्धुक्लेशः, मरणञ्च सम्भाव्यते –

भित्ति-स्तम्भ-तुलादीनि तद्विहाय प्रविन्यसेत् ।
मर्मवेद्धात् कुलोच्चाटो बंधुभीरूपर्मण ॥ 18

**प्रसङ्गेऽस्मिन् विश्वकर्मवचनम् –**

न तानि पीडयेत्प्राज्ञोऽशुचिभाण्डैश्च कीलकैः ।
स्तम्भैश्च शल्यदोषैश्च गृहस्वामिषु पीडनम् ॥
तस्मिन्नवयवे तस्य बाधा चैव प्रजायते । 19

अर्थात् विद्वांसः अपवित्रभाण्डैः, कीलकैः, स्तम्भादिभिः वास्तोः मर्मस्थानस्य वेधः नैव कुर्युः, यतोहि वेधेन वास्तुपुरुषस्य यदङ्गं पीडितं भवति, तस्मिन्नेवाङ्गे गृहस्वामी पीडामनुभवति । यथा व्यवहारेऽपि दृश्यते यत् गृहस्वामिना भवने वास्तुपुरुषस्य शीर्षे पीड्यते चेत् सः शिरोवेदनादि-व्याधिभ्यः व्याकुलः भवति ।

आचार्येण वराहमिहिरेणाप्युक्तम् –

तान्यशुचिभाण्डकीलस्तम्भाद्यैः पीडितानि शल्यैश्च ।
गृहभर्त्तुस्तत्तुल्ये पीडामङ्गे प्रयच्छन्ति ॥ 20

प्रसङ्गोऽयं मयमतेऽपि प्राप्यते । तद्यथा –

व्याधयस्तु यथासङ्ख्यं भर्तुरङ्गे तु संश्रिताः ।
तस्मात् परिहरेद् विद्वान् पुरुषाङ्गं तु सर्वथा ॥ 21

**मर्मवेधस्य परिहारः –**

समराङ्गणसूत्रधारे ग्रन्थकर्त्रा श्रीभोजदेवेन अत्यन्तसूक्ष्मतया चिन्तनं कृत्वा मर्मस्थानस्य वेधेऽपि तस्य दोषाभावः कथं भवितुं शक्यते इत्युक्तम् –

अंशकाश्चोर्ध्ववंशाश्च तुम्बिकाः सेन्द्रकीलकाः ।
पुरप्रासादगेहानां वेधेऽप्येते न दोषदाः ॥ 22

अर्थादपरिहार्यस्थितौ मर्मस्थानेषु, अतिमर्मस्थानेषु, ब्रह्मस्थाने वा निर्माणकार्यस्यावश्यकतामनुभूयते चेत्तत्र अंशुक-ऊर्ध्ववंश-तुम्बिका-इन्द्रकीलानामुपयोगः कर्तुं शक्यते । श्रीभोजदेवस्य कथनस्याभिप्रायो वर्तते यत् अंशुकादिभिः यदि वास्तुपुरुषस्य अतिसंवेदनशीलस्थानानां वेधः भवति, तदापि तत्र दोषः नेति ।

**उपसंहारः –**

वास्तुपुरुषस्याङ्गेषु मुख्यतया अतिसंवेदनशीलाङ्गानि सन्ति शिरः, मुखं, हृदयं, स्तनद्वयं, नाभिप्रदेशश्चेतानि मर्मस्थानानि, वास्तोः मध्ये ब्रह्मस्थानं, वंश-रज्जूसूत्राणाञ्च सम्पातस्थानानि । प्रकारान्तरेण मर्मस्थानविषये अन्यत्र उपमर्मस्थानानां विवेचनमपि प्राप्यते, किंतु सम्प्रतिकाले उपरिनिर्दिष्टविषयाणामेव विचारः मुख्यतया क्रियते, अत एतेषां निर्दिष्टानां मर्मस्थानादीनामुपरि विशेषतया ध्यानं दद्यादेवञ्च यथाशक्यं मर्मस्थानानामवश्यमेव रक्षणं कुर्यात् । यदुक्तं वराहमिहिरेण-

सुखमिच्छन् ब्रह्माणं यत्नाद्रक्षेद्गृही गृहान्तःस्थम् । 23

एवमुपर्युक्तानां विषयाणां सम्यगवलोकनेनेदं स्पष्टं प्रतिभाति यद्वास्तुनिर्माणात् पूर्वं मर्मदोषस्य सम्यक्तया विचारं कृत्वैव वास्तोः निर्माणः कर्तव्यः । अनेन गृहे निर्बाधरूपेण सकारात्मक-ऊर्जायाः शुद्धवायोश्च प्रवाहः भविष्यति, परिणामतः गृहस्वामी परिवारेण सह प्रसन्नतापूर्वकं गृहे निवसन् कीर्तिं, समृद्धिं, संतानसुखमायुष्यञ्च प्राप्स्यति । अतः वास्तुनिर्माणमपेक्षितदोषरहितं भवेत् –

एवं विधं दोषकरं गृहं स्याद् भर्तुश्च कर्तुश्च यतस्तदेते ।
ज्ञेयाः सदा शिल्पिभिरप्रमत्तैस्त्याज्याश्च दोषाः शुभकीर्तिकामैः ॥ 24

**सन्दर्भग्रन्थसूची-**


1. मयमतम् – 2/1
2. विश्वकर्मवास्तुशास्त्रम् – 7/1
3. बृहद्वास्तुमाला - 7
4. मयमतम् – 27/17-18
5. चतुःषष्टिपदे वास्तु मेकाशीत्या शतेन च । पुरे राजगृहे हर्म्ये प्रासादे मण्डपेऽर्च्चयेत् ॥-वास्तुसारमण्डनम् आयतत्त्वञ्च- 4/10
6. समराङ्गणसूत्रधारः – 13/3-5
7. बृहत्संहिता- 53/42 (उत्तरार्धम्)
8. एकाशीतिविभागे दश दश पूर्वोत्तरायता रेखाः ।- बृहत्संहिता- 53/42 (पूर्वार्धम्)
9. वास्तुमञ्जरी – 1/61
10. समराङ्गणसूत्रधारः – 13/7
11. रोगाद्वायुं नयेत् सूत्रं पितृतोऽथ हुताशनम् । एतत् सूत्रद्वयं प्रोक्तं मुनिभिर्वंश संज्ञितम् ॥ बृहत्संहिता– 53/57 (हिन्दीटीका-पं.श्री अच्युतानन्द झा)
12. बृहत्संहिता – 53/57
13. मयमतम् – 7/54
14. वितथाच्छोषकं चान्यद्भृशं मुख्यात्तथा नयेत् । जयन्ताद्भृङ्गराजाख्यं सुग्रीवमदितेस्तथा ॥ एतच्चतुष्टयं प्रोक्तं रज्जुसंज्ञं मनीषिभिः । बृहत्संहिता – 53/57 (हिन्दीटीका-पं.श्री अच्युतानन्द झा)
15. बृहत्संहिता – 53/63-64
16. मयमतम् – 7/55
17. समराङ्गणसूत्रधारः – 13/12-16
18. वास्तुमञ्जरी – 1/69
19. विश्वकर्मप्रकाशः – 5/29-30
20. बृहत्संहिता – 53/58
21. मयमतम् – 7/56
22. समराङ्गणसूत्रधारः – 13/23
23. बृहत्संहिता – 53/66
24. समराङ्गणसूत्रधारः – 48/140